# .. Shri Vidyaranyamunikritam Durvasana PratikAra Dashakam ..
# ॥ श्रीविद्यारण्यमुनिकृतं दुर्वासनाप्रतिकारदशकम् ॥

प्रातर्वैदिककर्मतस्तदनु सद्वेदान्तसच्चिन्तया
पश्चाद्भारतमोक्षधर्मकथया वासिष्ठरामायणात् । var धर्ममननात्
सायं भागवतार्थतत्त्वकथया रात्रौ निदिध्यासनात् var दिव्यकथया
कालो गच्छतु नः शरीरभरणं प्रारब्धकन्ठार्पितम् ॥ १॥
अज्ञानं त्यज हे मनो मम सदा ब्रह्मात्मसद्भावनात्
var मनोऽपि च सदा ब्रह्मात्मसम्भावनात्
सङ्कल्पानखिलानपि त्यज जगन्मिथ्यात्व सम्भावनात् ।
कामं साधनसाधनाश्रम परिध्यानादजस्रं त्यज
क्रोधं तु क्षमया सदा जहि बलाल्लोभं तु सन्तोषतः ॥ २॥
जिह्वोपस्थसुखभ्रमं त्यज मनः पर्यन्तदुःखेक्षणात्
पारुष्यं मृदुभाषणात्त्यज वृथालापश्रमं मौनतः ।
दुस्सङ्गं त्यज साधुसङ्गमबलाद्गर्वं तु भङ्गेक्षणात्
निन्दादुःखमनिन्द्यदेवमुनिभिर्निन्दाकथासंस्कृतेः ॥ ३॥
निद्रां सात्विकवस्तुसेवनतया स्वप्नं सदा जागरात् var सेवकतया
रोगान् जीर्णमिताशनाद्दैन्यं महाधैर्यतः ।
अर्थानर्थपरिग्रहं त्यज वृथा संसर्गसन्त्यागतः
स्त्रीवाञ्छां त्यज दोषदर्शनबलाद्दुःखं सुखात्मेक्षणात् ॥ ४॥
दारासक्तिमनादरात्सुतधनासक्तिं त्वनित्यत्वतः
स्नेहं मोह विसर्जनात्करुणया नैष्ठुर्यमन्तस्त्यज ।
औदासीन्य समाश्रयात्त्यज सुहृन्मित्रारि दुर्वासना
सर्वानर्थकरान् दशेन्द्रियरिपूनेकान्तवासान् जहि ॥ ५॥
आलस्यं त्वरया श्रमं श्रमधिया तन्द्रीं समुत्थानतः
भेद भ्रान्त्यभेददर्शनबलात्तां मिथ्यात्वतः सत्यताम् ।
मर्मोक्तिं निज मर्म कर्म कथया क्रोधं स्वसाम्येक्षणात्
आक्रोशं कुशलोक्तितस्य च मनश्छिन्द्यप्रमादो भयम् ॥ ६॥
भूतार्थस्मरणं वृथा भ्रम धिया प्राप्तं तु हानेक्षणात्
भव्यर्थव्यसनं सदा त्यज मनः प्रारब्धचोद्येक्षणात् ।
शिष्टाशिष्टजनक्रियास्त्यज वृथाकष्टानुसन्धानतः
स्नेहाद्वेषमतिं सदा त्यज जनं भस्मांस्तथा संस्मृतेः ॥ ७॥
अध्यात्मादि भवं सदा त्यज मनस्तापं स्वभावेक्षणात्
वैषम्यं समभावतः परकथा विक्षेपमक्षोभतः ।

धिक्कारादि भवन्तु दुःखमनिशं तद्योग्यता भावनात्
तज्ञातज्ञ शिशून्क्षमस्व कृपया कर्मक्षया ताडनम् ॥ ८॥
आयुर्गच्छति पेटिकामिव जलं सन्त्यज्यदेहं जवात् var पेटिकाजलमिव त्यक्तैव देहं
गच्छन्तीन्द्रियशक्तयोऽपि कुलटा यद्वन्नरं निर्धनम् ।
प्रज्ञां गच्छति धावदाहसमये नीडं मृगीपक्षिवत्
var प्रज्ञा गच्छति दावदाहसमये श्रेणी मृगीणामिव
ज्ञात्वा सत्वरमाश्रयमात्मपदवीं देहं वृथा मा कृथाः ॥ ९॥
धैर्यैरावतशान्तिधेनुदमना मन्दारवृक्षं सदा
मैत्र्याद्यप्सरसं विवेकतुरगं सन्तोषचिन्तामणिम् ।
आत्मज्ञानमहामृतं समरसं वैराग्यचन्द्रोदयम् var नैराश्यचन्द्रोदयम्
वेदान्तार्णवमाश्रयन्ननुदिनं सेवस्व मुक्तिश्रियम् ॥ १०॥
प्रसादाद्दक्षिणामूर्तेः शृत्याचार्य प्रसादतः ।
दुर्वासना प्रतीकार दशकं रचितं मया ॥

॥ इति श्रीविद्यारण्यमुनिकृतं दुर्वासनाप्रतिकारदशकं सम्पूर्णम्॥

Encoded and proofread by Ankur Nagpal ankurnagpal108 at gmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated December 19, 2017
http://sanskritdocuments.org